# आत्रेय शिक्षा

अथ क्रमव्युत्क्रमाद्यतो जटा भवेदार्षजसंधिजस्वरात्
विलोक्य शिक्षादिकमादरात्ततः प्रकाश्यते सा विदुषां
मुदे मया १
पदद्वयनिमित्तं स्यादेका भावेति तत्र तु
संहितावत्क्रमे ज्ञेयस्तद्वत् ज्ञेया जटा बुधैः २
स्वरवर्णादभेदः स्यादनिद्यं द्वितयस्य च
जटा विचक्षणैरुक्तं क्रमोच्चारणमत्र तु ३
लस्वरात्स्वरवर्णाच्च दीर्घञ्च परतस्थितः
एकवर्णाच्च दीर्घञ्च पदञ्चैव इदानीं तुल्य उच्यते ४
अनित्यतृणयकारस्य व्यञ्जने तु निमित्तके
जटाधान्नैव लोपः स्यादकारस्येति निर्णयः ५

---

प्रश्नानुवाका प्रारंभे सविसर्गोच्चको हरिः २०
असन्धिः प्रणवस्यादौ विरामे स्वरितो भवेत्
विधे मद्ध्यस्थनासिक्यो न विरोधो भवेत्स्मृतः २१
तस्मात्करोति कार्याणि वर्णानां धर्म एष तु
इन्द्रधा विषयो यो सा वर्णरित्युच्यते बुधैः २२
चतुर्भिरणुभिर्मात्रा परिमाणमिति स्मृतम्
रंगप्लुश्चतुर्मात्रः शुद्धप्लुतस्त्रिमात्रिकः २३
दीर्घ उच्च द्विमात्रः स्याद्ध्रस्वश्चाप्येकमात्रिकः
परस्वरस्य संयोगस्पर्शानां सुभवेद्यदि २४
तयोरादिश्रुतिर्नास्ति विरामव्यञ्जनस्य च

अनन्त्यञ्च भवेत्पूर्वमन्त्यञ्च परतो यदि २५
तयोर्मर्द्ध्ये यस्तिष्ठन् नासिकास्थानमुच्यते
नासिक्यत्वमुरस्यत्वं पञ्चमैर्हस्य योगतः २६
अन्तस्थाभिरुरस्यत्वं कण्ठकत्वं केवलस्य तु
पदादौ पदमध्ये वा स्थितस्योष्मपरस्य वै २७
प्रथमस्य द्वितीयत्वं पूर्वं कुर्वीत पण्डितः
धूद्दक्ष्णौ द्वन्द्वक्ष्णाषमित्यत्र अनुस्वारो विधर्मतः २८
इत्यात्रेयशिक्षा

Reference:
Descriptive Catalogue of Manuscripts of the VVBISIS Collection, Panjab University, compiled by B.R. Sharma, Hoshiarpur: Vishveshvaranand Vishva Bandhu Institute of Sanskrit and Indological Studies, 1975, xi, p. 300, #4371. Collection currently housed at the DAV College in Chandigarh. The second page of the manuscript is a misplaced page from Siddhānta Śikṣā, another Śikṣā in the same bundle, and has not been included here.